श्री दुर्गा स्तोत्रं (अर्जुन कृतं)

श्री दुर्गा स्तोत्रं (अर्जुन कृतं)

अर्जुन उवाच |
नमस्ते सिद्धसेनानि आर्ये मंदरवासिनि |
कुमारि काळि कापालि कपिले कृष्णपिंगळे || 1 ||

भद्रकाळि नमस्तुभ्यं महाकाळि नमोऽस्तु ते |
चंडि चंडे नमस्तुभ्यं तारिणि वरवर्णिनि || 2 ||

कात्यायनि महाभागे कराळि विजये जये |
शिखिपिंछध्वजधरे नानाभरणभूषिते || 3 ||

अट्टशूलप्रहरणे खड्गखेटकधारिणि |
गोपेंद्रस्यानुजे ज्येष्ठे नंदगोपकुलोद्भवे || 4 ||

महिषासृक्प्रिये नित्यं कौशिकि पीतवासिनि |
अट्टहासे कोकमुखे नमस्तेऽस्तु रणप्रिये || 5 ||

उमे शाकंभरि श्वेते कृष्णे कैटभनाशिनि |
हिरण्याक्षि विरूपाक्षि सुधूम्राक्षि नमोऽस्तु ते || 6 ||

वेदश्रुतिमहापुण्ये ब्रह्मण्ये जातवेदसि |
जंबूकटकचैत्येषु नित्यं सन्निहितालये || 7 ||

त्वं ब्रह्मविद्या विद्यानां महानिद्रा च देहिनां |
स्कंदमातर्भगवति दुर्गे कांतारवासिनि || 8 ||

स्वाहाकारः स्वधा चैव कला काष्ठा सरस्वती |
सावित्री वेदमाता च तथा वेदांत उच्यते || 9 ||

स्तुतासि त्वं महादेवि विशुद्धेनांतरात्मना |
जयो भवतु मे नित्यं त्वत्प्रसादाद्रणाजिरे || 10 ||

कांतारभयदुर्गेषु भक्तानां चालयेषु च |
नित्यं वससि पाताळे युद्धे जयसि दानवान् || 11 ||

त्वं जंभनी मोहिनी च माया ह्रीः श्रीस्तथैव च |
संध्या प्रभावती चैव सावित्री जननी तथा || 12 ||

तुष्टिः पुष्टिर्धृतिर्दीप्तिश्चंद्रादित्यविवर्धिनी |
भूतिर्भूतिमतां संख्ये वीक्ष्यसे सिद्धचारणैः || 13 ||

इति श्रीमन्महाभारते भीष्मपर्वणि त्रयोविंशोऽध्याये अर्जुन कृत श्री दुर्गा स्तोत्रं |